## नॄन् पे। (१०/१४१)

नॄन् इत्येतस्य नकारस्य रुर्भवति [1]पशब्दे परतः। अकारः उच्चारणार्थः। [2]नॄँः पाहि, नॄंः पाहि। नॄँः प्रीणीहि, नॄंः प्रीणीहि। पे इति किम्? [3]नॄन् भोजयति। उभयथा [4]इत्यपि केचिदनुवर्तयन्ति, नॄन् पाहि इत्यपि यथा स्यात्॥

## स्वतवान् पायौ। (११/३६३३)

स्वतवान् इत्येतस्य नकारस्य रुर्भवति पायुशब्दे परतः। '[5]स्वतवाँः पायुरग्ने' (ऋ. ४. २. ६)॥

## कानाम्रेडिते। (१२/१४३)

कान् इत्येतस्य नकारस्य रुः भवति आम्रेडिते परतः। कांस्काना[6]मन्त्रयते। [7]कांस्कान् भोजयति। अस्य कस्कादिषु पाठो द्रष्टव्यः। तेन 'कुप्वोः ≍क ≍पौ च' (८. ३. ३७/१४२) इति[8] न भवति। 'समः सुटि' (८. ३. ५/१३५) इत्यतो वा सकारोऽनुवर्तते, स एवात्र विधीयते। पूर्वेषु[9] योगेषु [10]सम्बन्धावृत्त्या गतस्य रोः अत्र अनभिसम्बन्धः। आम्रेडिते इति किम्? [11]कान् कान् पश्यति। [12]एकोऽत्र कुत्सायाम्॥

## ढो ढे लोपः। (१३/२३३८)

ढकारस्य ढकारे[13] लोपो भवति। [14]सत्यपि पदाधिकारे तस्यासम्भवाद् अपदान्तस्य ढकारस्यायं लोपो विज्ञायते। लीढम्। [15]उपगूढम्। [16]ष्टुत्वस्यात्र सिद्धत्वमाश्रयाद् द्रष्टव्यम्। [17]श्वलिड् ढौकते इत्यत्र [18]तु जश्त्वे कृते [19]कार्यं नास्ति [20]इति लोपाभावः। [21]न च ढलोपो [22]जश्त्वापवादो विज्ञातुं [23]शक्यते, तस्य हि लीढादिः विषयः सम्भवति। [24]तत्र हि श्रुतिकृतमानन्तर्यमस्ति। शास्त्रकृतं तु यदा नानन्तर्यं ष्टुत्वस्यासिद्धत्वेन प्राप्तम्, तत् तु सूत्रकरणसामर्थ्याद् बाध्यते। श्वलिड् ढौकते इत्यत्र तु न श्रुतिकृतमानन्तर्यम्, [25]न शास्त्रकृतमिति अविषयोऽयं ढलोपस्य॥

## रो रि। (१४/१७३)

रेफस्य रेफे परतो लोपो भवति। नीरक्तम्। दूरक्तम्। अग्नी रथः। इन्दू रथः[26]। पुना रक्तं वासः। प्राता राजक्रयः। पदस्य इत्यत्र [27]विशेषणे षष्ठी[28], तेन अपदान्तस्यापि रेफस्य लोपो भवति, जर्गृधेः अजर्घाः, पास्पर्धेः अपास्पाः इति॥

---

1. पकारे क, पे परतः इ. 2. नॄन पाहि इ, नॄन् पाति ह. 3. नॄन् वक्ति क. इ. 4. इत्येव ड. 5. स्वतवान् क, भुवस्तस्य इत्यधिकम् ह. 6. आनयति ह. 7. कॉंस्कान् इ. 8. एतत् इत्यधिकम् ड. इ. ह. 9. तु इत्यधिकम् क. 10. अनुवृत्तेरस्य नाभिसम्बन्धः ब. इ. 11. कान् नास्ति इ. 12. एको नास्ति ड. ह. 13. परतः इत्यधिकम् ब. क. 14. यद्यपि ब. 15. मूढम् अवगूढम् क. 16. ष्टुत्वासिद्धत्वमाश्रयात् सिद्धम् क. 17. स्वलिड् ड. 18. तु नास्ति ब. 19. कार्यी ब. क. 20. अतः ब. 21. वाक्यमिदं नास्ति ड. 22. जश्त्वं बाधते ब. 23. शक्यः क. 24. अत्र इ. 25. वापि क. 26. वायू रथः इत्यधिकम् क, पटू रथः इत्यधिकम् ब. ड. 27. विशेषणषष्ठी क. 28. न स्थानषष्ठी इत्यधिकम् ब. क. ड. इ.